The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 1 July, 2025 Home Page: www.tgjct.org Email: editor@tgjct.org

# दर्शनशब्दार्थविमर्शः

***Dr. Ranjan Mandal***
*Assistant Professor, Deshapran College of Teachers' Education*
Email: ranjanmandal12041986@gmail.com

***Received***
***24/06/2025***

***Accepted***
***30/06/2025***

***Published***
***04/07/2025***

***प्रबन्धसारः***

*"दर्शन" इति शब्दः संस्कृतसाहित्ये तथा तत्त्वचिन्तायां बहुविधार्थकत्वेन समुपस्थितः। एषः शब्दः "दृश्" धातोः ल्युट् प्रत्यये कृते निष्पद्यते, यस्य प्रयोगः भावे, कर्मणि, करणि, अधिकरणे च विधीयते। अत्र दर्शनशब्दः केवलं चक्षुषा द्रष्टव्यमेव न सूचयति, अपि तु यथातथ्येन ज्ञातव्यम्, परीक्षितव्यम्, अनुभावनीयञ्च तत्वं बोधयति। आत्मा, ब्रह्म, जीवः, प्रकृतिः, इत्यादीनां विश्लेषणात्मकं बोधनं दर्शनस्य स्वरूपमस्ति। न्यायदर्शने, योगदर्शने, पाशुपतदर्शने, उपनिषद्वाक्येषु च दर्शनशब्दः ज्ञानस्य, बोधस्य, साक्षात्कारस्य, बुद्धिशक्तेः च पर्यायरूपेण प्रयुज्यते। उपनिषद्भ्यः ज्ञायते यत् आत्मा दृष्टव्यः, श्रोतव्यः, मन्तव्यः, निदिध्यासितव्यश्च – एते एव दर्शनहेतवः। भगवद्गीतायामपि दर्शनं दिव्यस्वरूपबोधनार्थं प्रयोगः दृश्यते। दर्शनं न केवलं दृष्टेः विषयं, अपि तु ज्ञानप्रक्रिया, साक्षात्कारे, आत्मबोधे, तत्त्वनिष्ठायाम् अपि तं बोधयति। आर्षदृष्ट्या साक्षात्कृतं ज्ञानं नित्यं, अबाधितं च स्यात् – यत्र रागद्वेषादयो न सन्ति, तत्र ज्ञानस्य पारमार्थिकता स्पष्टा। एवञ्च अतीन्द्रियविषयानां प्रत्यक्षीकरणं दर्शनस्य लक्ष्यं भविष्यति। भारतीयदर्शनेषु आत्मपरिचयः, तत्त्वविचारः, जगत्स्वरूपविमर्शः च प्रमुखतया विवेच्यते। अतो हि "दर्शनशास्त्रम्" इति न केवलं ग्रन्थनाम, अपि तु आत्मविद्यायाः परिपाकाय साधनशास्त्रं भवति। दर्शनशब्दस्य समग्रं आध्यात्मिकं, आधिभौतिकं च विवेचनं व्याप्नोति।*

***मुख्यशब्दाः*** *दर्शनम्, तत्त्वज्ञानम्, ल्युट्प्रत्ययः, आर्षज्ञानम्, आत्मसाक्षात्कारः*

दर्शनशब्दोऽयं प्रेक्षणार्थकाद् **"दृश्"** धातोः (**दृशिर् प्रेक्षणे**[१]) ल्युट्प्रत्यये कृते दर्शनशब्दो निष्पद्यते। एष च ल्युट्प्रत्ययो **भावे**[२], **कर्मणि**[३],**करणे**[४], **अधिकरणे**[५], चेत्येतेष्वर्थेषु विधीयमानोऽर्थभेदस्य प्रयोजकी जायते। तथा हि भावे ल्युट्प्रत्ययविधानेन निष्पन्नो दर्शनशब्दोऽवलोकनक्रियायाः बोधकः। किं नाम दर्शन? दृश्यते ज्ञायते परमं तत्त्वमनेन इति दर्शनम्। दर्शनं नाम सदसज्ज्ञानसोपानमिति। येन साधनेन इदं विश्वम्, इदं वस्तुजातम्,ब्रह्म,जीवात्मा,प्रकृतिश्च,याथातथ्येन दृश्यते निरीक्ष्यते परीक्ष्यते समीक्ष्यते विविच्यते च तद् दर्शनम्। अतः समग्रमपि आध्यात्मिकम् आधिभौतिकं च विवेचनं दर्शनं शब्दान्तर्गतं भवति। तदुक्तममरकोशे **"निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्"**[६] इति। कोशे यद्यपि अत्र दृश् धातुश्चाक्षुषज्ञानविषयव्यापारमववोधयति तथापि शास्त्रे सोऽयं ज्ञानसामान्य वर्तते। अतः **"अदर्शनं लोपः"**[७] इति सूत्रे दृशिरिह ज्ञानसामान्ये वर्तत इति **नागेशो व्याचष्टे**[८], तच्च शब्दानुशासनप्रस्तावाद् दर्शनशब्दोऽयं शब्दस्य श्रवणं नाम श्रवणहेतुकमुच्चारणं बोधयत ीत्यदर्शनशब्देन शब्दकर्मकोच्चारणसत्ताया एव निषेधः क्रियत इति तस्यैव लोपसंज्ञाविधानेन चरितार्थमदर्शनं लोपः इति सूत्रमेतत्।


***All rights reserved. © 2025***

न्यायदर्शने महर्षिगौतममुनिप्रणितं **"तत्त्वज्ञानसाधनशास्त्रं दर्शनम्"**। पाशुपतदर्शने तु एकस्या एव दृक्शक्तेः विषयभेदात् पञ्चविधोपचारो भवतीति निरूप्य ज्ञानमेव दर्शनपदेनाभिहितम्- **"दृक्शक्तिरेकाऽपि विषयभेदात् पञ्चविधोपचर्यते दर्शनं,श्रवणं,मननं,विज्ञानं,सर्वज्ञत्वञ्चेति। तत्र सूक्ष्मव्यवहितविप्रकृष्टाशेषश्चाक्षुषस्पर्शादिविषयं ज्ञानं दर्शनम् इति"**[९]।

पातञ्जलयोगदर्शने **बुद्धिर्दर्शनशक्तित्वेन अभिहिता**[१०] । तत्र च भोजवृत्तिकारः – **"दर्शनशक्तीरजस्तमोभ्यामनभिभूतस्सात्त्विकः परिणामोऽन्तकरणरूपः"**[११] इति व्याचक्षाणोऽन्तःकरणस्य सात्त्विकं परिणाममेव दर्शनशक्तिशब्देननिरदिशत्।

उपनिषत्सु दर्शनशब्दो ल्युडन्तत्ने अपरोक्षानुभूतिरूपं साक्षात्कारमेव विषयीकरोति। तथा हि- **"आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासित्यव्यो मैत्रैयि। आत्मनो वारे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्"**[१२]।

तत्र च शाङ्करभाष्यम् - **"एवासौ दृष्टो भवति श्रवणमनननिदिध्यासनसाधनैर्निर्वर्तितैः"**[१३]।

प्रवचनभाष्यकारश्चाह –

**श्रोतव्योः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येयमेते दर्शनहेतवः**[१४] ॥

कर्मणि तु दृश्यते इति दर्शनमिति व्युत्पत्त्या बाहुलकात् विहितेन ल्युट्प्रत्ययेन निष्पन्नो दर्शनशब्दो दृश्यमाकारं किमपि विशिष्टं स्वरूपं वाऽभिधत्ते।

तथाहि –

**अनेकवक्त्रनयनमनेकाद्भूतदर्शनम्।**
**अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्**[१५] ॥

इति भगवद्गीतायां दर्शनशब्दो भागवतो दिव्यं स्वरूपं बोधयन् कर्मलुडन्तत्वेनादाहर्तुं शक्यते। एवमेव सुदर्शनोऽयं पुरुषः क्रूरदर्शनोऽयं व्याधः इत्यादौ दर्शनशब्दस्तथैव व्युत्पत्त्याऽऽकृतिविशेषमाचष्टे। करणल्युडन्तो दर्शनशब्दस्तु दृश्यते ज्ञायते येन तद् दर्शनमिति व्युत्पत्त्या ज्ञानसाधनभूतानाम् भतृहरिस्तादृशार्थप्रतिपिपादयिषया दर्शनशब्दं बहुधा प्रायुङ्क्त। तथाहि –

**वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते।**
**कैश्चिद् दर्शनभेदो हि प्रवादेष्वनवस्थितः**[१६] ॥

शवरस्वामी उक्तम् – **"सर्वत्र नो दर्शनं प्रमाणम्"**[१७] । किञ्च दर्शनशास्त्रमित्यादौ प्रयुक्तो दर्शनशब्दः एतादृशाधिकरणव्युत्पत्तिलभ्य एव।

एवञ्चतसृभिर्व्युत्पत्तिभिर्दर्शनशब्दस्य विविधार्थकत्वे सिद्धेऽपि दर्शनं प्रामुख्येन शास्त्रेषु व्यावहारिकतामतिरिच्य सूक्ष्ममतीन्द्रियमार्षमलौकिकज्ञानविषयकमेव। अत्रेदमाकूतं – ज्ञानं हि द्विविधं जन्याजन्यभेदेन। तत्र विषयोन्द्रियसंयोगाज्जायमानं ज्ञानञ्जन्यमनित्यमपारमार्थिकञ्च। आर्षेण चक्षुषा साक्षात्कृतं ज्ञानन्तु नित्यं पारमार्थिकमबाधितञ्च –

**अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चाक्षुषा।**
**ये भावान् वचनं तेषां नानुमानेन बाध्यते**[१८] ॥


All rights reserved. © 2025

The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 1 July, 2025 Home Page: www.tgjct.org Email: editor@tgjct.org

योगिनो हि चर्मचक्षुर्भिन्नेन केनाप्यन्येन नेत्रेण परिपश्यन्त इन्द्रियातीतं ज्ञानं बिभ्रति। यद्यपि अतीन्द्रियमनागतं भूतं भविष्यद्रूपं वा वस्तु पश्यन्ति तथापि कश्चित् बलवता तर्केण तद् बाधितं न प्रभवति। आर्षेण चक्षुषा प्रत्यक्षीकृतं तत्त्वं वस्तु वा प्रत्यक्षान्न व्यातिरिच्यते न वा विशिष्यते –

**आविर्भूतप्रकाशानामनुपप्लुतचेतसाम्।**
**अतीतीनागतज्ञानं प्रत्यक्षान्न विशिष्यते[११] ॥**

तथा हि ज्ञेयं सर्वमपि ज्ञानप्रकाश्यमेव। अतो भूतभविष्यज्ज्ञानयोर्न कोऽपि विशेषः। अस्माकं तु रागद्वेषादिलिप्तत्वेन सोपाधिकत्वेन अस्मत्सम्बन्धेन ज्ञानमपि सोपाधिकं सदतीतानागतविषये तत् बाध्यते। ये त्वज्ञानापाकरणेन रागद्वेषादिविरहितास्तेन च आविर्भूतप्रकाशास्तेषां ज्ञानस्य निरूपाधिकत्वेन नास्ति तत्र दिक्कालादिप्रतिबन्धस्तर्कादिबाधश्च।

एवञ्च ज्ञानविरोधिना अज्ञानेनावृतं ज्ञानं यदाऽन्तकरणोपाधीनां रागद्वेषादीनामपगमे सति परिप्रकाशते तदैव तज्ज्ञानमार्षसंज्ञं सद्दर्शनपदवाच्यतां भजतीति तात्पर्यम्।

भारतीयानां या सुविशाला तत्त्वज्ञाननिष्ठा वैदिकीपरम्परा सा आत्मकेन्द्रिकता वरिवर्त्ती। तत्र परिलक्ष्यते कश्चन निश्चितविधिः, सुचिन्तितः सिद्धान्तः, सुतर्कनिष्ठा विलक्षणा प्रक्रिया च। तामेव प्रक्रियामाश्रित्य सर्वोऽपि प्राणभृत् स्वात्मपरिचयार्थं कृतप्रयत्नो दृश्यते। एतत् सर्वं तत्त्वज्ञाननिरूपकात्मके दर्शनप्रस्थाने अस्माभिरवलोकयितुं शक्यते। अस्माकं तपोधनाः महर्षयः आत्मनिष्ठमनुभवं लिपिबद्धं कृत्वा दर्शनशास्त्रं द्वारीकृत्य आविर्भावयामासुः। तत्र आत्मनः सर्वप्रियत्वं प्रतिपादितम्। तदुक्तं – **"न वाऽरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिप्रियो भवतीति"**[१०] उपनिषदृषीणामाघोषः। अतः अत्यन्तप्रियभूतस्य आत्मनः रक्षणाय अस्माकं शास्त्रपरम्परा शतधा उपदिशति सहस्रधा मार्गान् प्रदर्शयति च। एतदेव दर्शनशास्त्रस्य परमं लक्ष्यम्। एतत्सर्वं तत्त्वज्ञानेन विना न सम्भवतीत्यतः तत्त्वज्ञानसाधनपरकं शास्त्रं दर्शनमिति अभिहितम्। अतः समग्रमपि आध्यात्मिकम् आधिभौतिकं च विवेचनं दर्शनं शब्दान्तर्गतं भवति।

**पादटीप्पणी** –

१. धा.तु.पा. – ९८८
२. ल्युट् च - अष्टा. ३.३.१५
३. दृश्यते यत् तद् दर्शनमिति बाहुलकात् ल्युट् प्रत्ययः कर्मणि। अष्टा.- ३.३.११
४. कारणाधिकरयोश्च – अष्टा.- ३.३.११७
५. तत्रेव
६. अ.को.- ३.२.३१
७. अष्टा.-१.४.५२
८. तत्रेव लघुशब्देन्दुशेखरे
९. सर्वदर्शनसंग्रहः –पृ.१६६
१०. बुद्धिदर्शनशक्तिः – योगभाष्ये – २-६
११. तत्रेव भोजवृत्तौ
१२. बृ.उ.-२.४.५


All rights reserved. © 2025

The Global Journal of Contextual Thought
(A Double-Blind, Peer-Reviewed, Quarterly, Multidisciplinary Journal)
Volume: 1, Issue: 1 July, 2025 Home Page: www.tgjct.org Email: editor@tgjct.org

१३. तत्रेव शङ्करभाष्ये

१४. प्रवचनभाष्ये उपोद्घाते

१५. भगवद्गीता – ११-१२

१६. वा.प.-१.१०७

१७. मीमांसाभाष्ये-१.१.३

१८. वा.प.- १.३८

१९. वा.प. – १.३७

२०. बृ.उ. – २-४-५


All rights reserved. © 2025